"महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते" ॥)
अनुमतिः । प्रकामम् । असूया । अनुगमनम् । इति मेदिनीकरहेमचन्द्रौ ॥

काममहः, पुं, (कामस्य महः उत्सवो यत्र ।) चैत्री पूर्णिमा । इति त्रिकाण्डशेषः ॥

कामयिता, [ऋ] त्रि, (कामयते । कम् + णिङ् + तृच् ।) कामुकः । इत्यमरः । ३ । १ । २४ ॥

कामरूपः, पुं, (मूलप्रकृतिर्भगवती कामरूपिणी सती यत्र देशे विराजमाना स देशस्तन्नाम्ना एव उच्यते ।) स्वनामख्यातदेशः । तत्पर्य्यायः । प्राग्ज्योतिषः २ । इति त्रिकाण्डशेषः ॥ तत्र कामगिरौ योनिपीठे कामाख्या देवी वर्त्तते । यथा ।
"योनिपीठं कामगिरौ कामाख्या तत्र देवता" ।
"सर्व्वत्र विरला चाहं कामरूपे गृहे गृहे" ॥
इति तन्त्रचूड़ामणौ पीठमाला ॥ (अयं हि गणेशगिरिशिखरस्थो देशः । यदुक्तं तन्त्रे ।
"कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम् ।
कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि" ॥
कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतं यावत् ॥
अयं खलु वङ्गदेशस्य ईशानभागे आसामप्रदेशस्य पश्चिमभागे वर्त्तते ॥)

कामरूपः, त्रि, (कामं काम्यं मनोहरं रूपं यस्य ।) मनोज्ञरूपः । स्वेच्छारूपः । (यथा महाभारते । १ । सुपर्णस्तुतौ २३ । ६ ।
"कामरूपः कामगमः कामवीर्य्यो विहङ्गमः" ॥)
तथा च । मेघदूते ६ ।
"जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः" ॥

कामरूपिणी, स्त्री, (कामं मनोज्ञं रूपं अस्त्यस्याः । कामरूप + इनि + ङीप् ।) अश्वगन्धावृक्षः । इति राजनिर्घण्टः ॥

कामरूपी, [न्] पुं, (कामं कमनीयं रूपमस्यास्तीति । कामरूप + इनिः ।) विद्याधरः । इति त्रिकाण्डशेषः ॥ जाहकजन्तुः । इति राजनिर्घण्टः ॥ (कामेन स्वेच्छया रूपं धार्य्यत्वेनास्त्यस्य इनिः ।) मनोज्ञरूपिणि स्वेच्छारूपिणि च त्रि । यथा,—
"सर्व्वमाशु विचेतव्यं हरिभिः कामरूपिभिः" ॥
इति रामायणम् ।

कामरेखा, स्त्री, (कामानां कामव्यापाराणां रेखा चिह्नं लक्षणं राजिर्वा यत्र ।) वेश्या । इति शब्दमाला ॥

कामलः, पुं, स्त्री, (कम + णिच् + कलच् ।) रोगविशेषः । कांमोल कामला इति च प्रसिद्धिः । इति मेदिनी ॥ तस्य निदानसम्प्राप्ती यथा,—
"पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते" ॥
तस्य लक्षणम् ।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः ।
रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ॥
दाहाविपाकदौर्ब्बल्यसदनारुचिकर्षितः ।
कामला बहुपित्तैषा कोष्ठशाखाश्रया मता ।
कालान्तरात् खरीभूता कृच्छ्रा स्यात्कुम्भकामला" ॥
तस्यारिष्टलक्षणम् ।
"कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः ।
सरक्ताक्षिमुखच्छर्द्दिर्विण्मूत्रो यश्च ताम्यति ॥
दाहारुचितृड़ानाहतन्द्रामोहसमन्वितः ।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली" ॥
इति माधवकरः ॥

कामलः, पुं, (कामयते अभीष्टमस्मिन् । कम + अधिकरणे + कलच् ।) वसन्तकालः । मरुभूमिः । (कामं लाति गृह्णातीति । काम + ला + कः ।) कामुके त्रि इति मेदिनी ॥

कामलता, स्त्री, (कामस्य लतेव ।) शिश्नः । इति हेमचन्द्रः ॥

कामला, स्त्री पुं, (कामल + टाप् ।) स्वनामख्यातरोगः । अथ पाण्डुरोगभेदस्य कामलाया निदानपूर्ब्बिकां संप्राप्तिमाह ।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते" ॥
पित्तं कर्त्तृ । दग्ध्वा संदूष्य । रोगाय कामलारूपाय । पाण्डुरोगिण एवातिशयितपित्तलसेवया कामला भवति । नायं नियमः । किन्तु कामला स्वतन्त्रापि भवति । यथा राजयक्ष्मा कासादुपेक्षिताद्भवति । नायं नियमः । किन्तु राजयक्ष्मा स्वतन्त्रापि भवति । तद्वदेषापि । ० ।
कामलाया लक्षणमाह ।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः ।
पीतरक्तशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ॥
दाहाविपाकदौर्ब्बल्यसदनारुचिकर्षितः" ॥
हारिद्रं हरिद्रावर्णम् । पीतरक्तशकृन्मुत्रः । पीते रक्ते वा शकृन्मूत्रे यस्य सः । भेकवर्णः रक्तकृष्णवर्णः । तस्या भेदावाह । "कामला बहुपित्तैषा कोष्ठशाखाश्रया मता" । एका कोष्ठाश्रया अपरा शाखाश्रया । तत्र कोष्ठकामलामाह । "कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला" । कालान्तरात् खरीभूता अतिरूक्षीकृतसर्व्वधातुः । कुम्भकामला कोष्ठकामलेत्यर्थः । सा कृच्छ्रा कष्टसाध्या ॥ ० ॥ कुम्भकामलिनोऽरिष्टलक्षणमाह ॥
"छर्द्यरोचकहृल्लासज्वरक्लमनिपीड़ितः ।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली" ॥
उभयोरपि कामलयोररिष्टलक्षणमाह ।
"कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः ।
सरक्ताक्षिमुखच्छर्द्दिर्विण्मूत्रो यश्च ताम्यति ॥
दाहारुचितृड़ानाहतन्द्रामोहसमन्वितः ।
नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान् विपद्यते" ॥ ० ॥
अथ कामलाचिकित्सा ।
"त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसः ।
प्रातर्म्माक्षिकसंयुक्तः शीलितः कामलापहः ॥
अञ्जने कामलार्त्तानां द्रोणीपुष्पीरसो हितः ।
गुडूचीपत्रकल्कं वा पिबेत्तक्रेण कामली ॥
धात्रीलोहरजोव्योषनिशाक्षौद्राज्यशर्कराः ।
लीढ़ा निवारयन्त्याशु कामलामुद्धतामपि ॥
कुम्भाख्यकामलायान्तु हितः कामलिको विधिः ।
गोमूत्रेण पिबेत् कुम्भकामलायां शिलाजतु ॥
दग्ध्वाक्षकाष्ठैर्मलमायसन्तु
गोमूत्रनिर्व्वापितमष्टवारान् ।
विचूर्णलीढ़ं मधुनाचिरेण
कुम्भाह्वयं पाण्डुगदं निहन्ति" ॥
इति भावप्रकाशः ॥ ० ॥
"मरीचतिलपुष्पाभ्यामञ्जनं कामलापहम्" ॥
इति गारुड़े १८७ अध्यायः ॥
"तण्डुलीयकगोक्षुरमूलं पीतं पयोऽन्वितम् ।
कामलादिहरं प्रोक्तं मुखरोगहरं तथा" ।
इति तत्रैव १८८ अध्यायः ॥

कामवती, स्त्री, (कामः कमनीयता अस्त्यस्याः । काम + मतुप् । मस्य वः । ङीप् च ।) दारुहरिद्रा । इति राजनिर्घण्टः । (कामः कन्दर्पभावः अस्त्यस्याः । मैथुनानुरागयुक्ता स्त्री । यथा महाभारते १ । शान्तनूपाख्याने ९७ । ५ ।
"त्यागः कामवतीनां हि स्त्रीणां सद्भिर्विगर्हितः" ॥)

कामवल्लभः, पुं, (कामः कमनीयः स्पृहणीय इत्यर्थः अत एव वल्लभः प्रियः । यद्वा कामस्य कन्दर्पस्य वल्लभः । कन्दर्पप्रियवसन्तकालोद्भवत्वात् तथात्वम् ।) आम्रः । इति राजनिर्घण्टः ॥

कामवल्लभा, स्त्री, (कामस्य कन्दर्पस्य वल्लभा प्रिया । कामोद्दीपकत्वात् तथात्वम् ।) ज्योत्स्ना । इति राजनिर्घण्टः ॥

कामवृद्धिः, पुं, (कामस्य वृद्धिर्यस्मात् ।) क्षुपविशेषः । कामज इति कर्णाटके प्रसिद्धः । तत्पर्य्यायः । स्मरवृद्धिसंज्ञः २ मनोजवृद्धिः ३ मदनायुधः ४ कन्दर्पजीवः ५ जितेन्द्रियाह्वः ६ कामजीवः ७ जीवसंज्ञः ८ । अस्य गुणाः । मधुरत्वम् । बलवर्द्धनत्वम् । कामवृद्धिविकारित्वम् । बहुलेन्द्रियवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥

कामवृन्ता, स्त्री, (कामं कमनीयं वृन्तं यस्याः ।) पाटलावृक्षः । इति शब्दमाला ॥

कामवृक्षः, पुं, (कामं यथेच्छं वीजाद्यनपेक्षतया उत्पन्नो वृक्षः ।) वन्दाकः । इति राजनिर्घण्टः ॥

कामशरः, पुं, (कामस्य कन्दर्पस्य शर इव कामोद्दीपकत्वात् ।) आम्रः । इति राजनिर्घण्टः ॥

कामसखः, पुं, (कामस्य सखा । "राजाहःसखिभ्यष्टच्" । ५ । ४ । ९१ । इति टच् ।) वसन्तकालः । इति राजनिर्घण्टः ॥

कामसुतः, पुं, (कामस्य सुतः ।) अनिरुद्धः । इति हेमचन्द्रः ॥

कामाख्या, स्त्री, (कामयते भक्तानां कामं पूरयति यद्वा भक्तैः साधकैः काम्यतेऽसौ इति कामा । कामा आख्या यस्याः ।) देवीविशेषः । तन्नामकारणं यथा ।
श्रीभगवानुवाच ।
"कामार्थमागता यस्मान्मया सार्द्धं महागिरौ ।
कामाख्या प्रोच्यते देवी नीलकूटे रहोगता ॥
कामदा कामिनी कामा कान्ता कामाङ्गदायिनी ।
कामाङ्गनाशिनी यस्मात् कामाख्या तेन चोच्यते ॥ ० ॥
तत्पीठकारणं यथा,—
"अथ काले बहुतिथे अतीते प्राक्तनज्जने ।